International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 55-56
© 2025 IJMH
www.themultijournal.com

Received: 27-09-2025
Accepted: 04-10-2025
Publish : 06-10-2025

**बदरीनाथ बळ्ळरिः**
शोधच्छात्रः द्वैतवेदन्तविभागः
पञ्जिकरणसंख्या: {21VVDDV073},
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**आचार्यः नारायणः**
द्वैतवेदान्तविभागाध्यक्षः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**बदरीनाथ बळ्ळरिः**
शोधच्छात्रः द्वैतवेदन्तविभागः
पञ्जिकरणसंख्या: {21VVDDV073},
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# न्यायामृते प्रथममित्यात्वभङ्गस्य नानामतरीत्य विमर्शः एवं न्यायामृतरसकुलङ्कषा कर्तृः परिजयः

**बदरीनाथ बळ्ळरिः, आचार्यः नारायणः**

‘भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा’ इत्याभणके संस्कृतस्य महत्त्वमुपवर्णितम्। तत्र ‘व्यासोच्छिष्ठं जगत्सर्वम्’ इत्युक्तरीत्या संस्कृतेर्मूलं च संस्कृतमेवेत्यगम्यते। यतः सर्वे सन्ति च संस्कृतसाहित्यप्रपंचे। तादृशेऽस्मिन् संस्कृतसाम्राज्ये चक्रवर्तितामापुः दर्शनानि। दर्शनान्यपि आस्तिकनास्तिकभेदेन द्वेधा । आद्ये न्यायवेदान्तमीमांसादयः। द्वितीये चार्वाकादयः। तत्र आस्तिकदर्शनेषु वेदान्तदर्शनस्य परमौन्नत्यं दरीदृश्यते। वेदान्तदर्शनेऽपि द्वैताद्वैतविषयिण्यः चर्चाः तत्र तत्र संचलन्ति। प्रायः ताः यमधिकृत्य तत् “न्यायामृतम्। अयं माध्ववेदान्तग्रन्थेषु अत्यन्तं प्रधानः कठिण इत्येव प्रसिद्धः। यः श्रीमद्व्यासराज-तीर्थश्रीपादैः (षोडशतमे शतके) निर्मितः॥

तत्र सामान्यतः ‘विश्वं मिथ्या दृश्यत्वात्’ इत्यनुमानं पुरस्कृत्य कथा प्रवर्तते। तदिदं मिथ्यात्वं कीदृशम् (किंरूपम्) इति जिज्ञासायां; नैके ब्रह्मवादिनः स्वस्वग्रन्थेषु बहुरीत्या निर्वचनं कृतवन्तः। प्राधान्येन पंचधा निरुक्तं दृष्यते । तत्रादौ पंचपादिकारीत्या ‘मिथ्यात्वं नाम सदसत्त्वानधिकरणत्वम्’ ॥

तत् व्यासाचार्याः त्रेधा विकल्प्य दूषयन्ति । सदसत्त्वानधिकरणत्वं - (१) सत्वे सति असत्वं, तस्य अत्यन्ताभावः वा, (२) सत्त्वाभाव असत्त्वाभाव इति धर्मद्वयं वा, (३) सत्वात्यन्ताभावविशिष्टा-सत्त्वात्यन्ताभावः विवक्षितः इति विकल्पः । तथाहि सत् च तत् असत् च सदसत्, तस्य भावः सदसत्त्वम्, तदनधिकरणत्वमिति प्रथमः। सत् च असच्च सदसती, तयोर्भावः[1] सदसत्त्वं, तदनधिकरणत्वमिति द्वितीयतृतीयौ[2] ॥

तत्र नाद्यः । जगत् सदेव, न सदसत् इति हि तत्त्ववादि मतम्। सन् घटादिः, असत् शशविषाणं, नकिंचित् सदसदिति सदसत्त्वमप्रसिद्धम्[3] ॥

न द्वितीयः। न सत् = असत्, इति असत्त्वं सत्त्वाभाव एव[4]। तद्विलक्षणत्त्वं पुनः सत्त्वमेव । अतः सद्विलक्षणत्वं विधय, असत्व निषेधे वा असत्वं निषिध्य, सत्त्वमपि निषिध्यते चेत् व्याहतिः[5]। किंच यथा निर्धर्मके ब्रह्मणि सत्त्वराहित्येऽपि (सद्रूपतामभिधाय) सदिति व्यवहारः क्रियते तथा जगदपि भवतु इत्यर्थान्तरता। कथंचित् (पृथिवीतरभिन्ना इव) साध्याप्रसिद्धिवारणसम्भवेऽपि दोषान्तराणमनि-वार्यत्वात् ।

नापि तृतीयः। प्रागुक्तव्याहत्यर्थान्तरयोस्तादवस्थ्यात्। अपिच सपक्षे शुक्तिरूप्ये साध्यवैकल्यम्। तत्ववादिभिः शुक्तिरूप्ये असदेकस्वभावे विशेषणस्य अनभ्युपगमात्। नच वाच्यम्। तत्त्ववादिनः असद्वैलक्षण्यस्य सिद्धत्वात् सर्वत्र असद्वैलक्षण्यांशसाधनस्य वैयर्थ्यात् सिद्धसाधनता च।

तत्राह मधुसूदनसरस्वत्याचार्यः । न ब्रूमो वयं ‘सदसद् न’ इति प्रथमपक्षं, किन्तु विमतं न ब्रह्मवत् सत्, नापि शशविशाणवदसत् इति सदसद्विलक्षणत्वं (द्वितीयतृतीयपक्षौ) सम्मतम्।

यदुक्तं 'सत्तामंगीकृत्य पुनस्तन्निषेधे, सत्त्वासत्वयोः परस्परविरह-रूपत्त्वाद्व्याहतिः' इति, तदयुक्तम्। सत्त्वासत्त्वयोः परस्परविरहतान-भ्युपगमात्। सत्त्वेन प्रतीमानत्वं सत्त्वमित्यंगीकारात्। त्वन्मतेऽपि तयोः परस्परविरहरूपत्वानुपपत्तेः। अप्रामाणिकप्रतियोगिक एव अत्यन्ताभावः तत्त्ववादिनः तव मते । तथाहि घटे यत् प्रतीतिसिद्धं सत्त्वं, तदत्यन्ताभाव एव शशविशाणेऽसत्त्वमिति वाच्यम् । तथासति घटगतसत्त्वस्यापि शशविशाणतुल्यता स्यात्। अत्यन्ताभाव-प्रतियोगित्वात् ।

तत्राहुस्तत्त्ववादिनः। न वयं वदामः घटगतसत्त्वस्यात्यन्ताभावः शशविशाणगतमसत्त्वम्। तदभावो घटे सत्त्वमिति च। किंतु शश-विशाणे सत्त्वं (बुद्धिपूर्वम्) आरोप्य निषिध्यते। तथा घटेऽप्यसत्त्वम्। नातः सत्त्वासत्त्वयोरसत्त्वप्रसंगः[6]। परस्परविरहत्वोक्तेः परस्परवि-रहव्याप्यत्वे व्यापकत्वे वा तात्पर्यम् ।

अद्वैतिनोऽब्रुवन्। परस्परविरहव्याप्यत्वव्यापकत्वविवक्षाभ्युपगमे-ऽपि व्याहतिर्नोपपद्यते। तथा हि। 'प्रतियोग्यारोपस्य प्रधानेन विरोधः, तस्मात् परस्परविरहव्यापकत्त्वं सम्भवति। तथाहि घटे एकं सत्त्वमारोप्य निषेधः कर्तुं यदि शक्येत तर्हि तत्रैव व्यभिचारः स्यात् (असत्त्वं नास्ति, आरोपितसतानिषेधः क्रियत इति)। न तथा। आरोपप्रधानयोर्विरोधाभ्युपगमात् । घटे वास्तवसत्त्वस्य वर्तनात्। इति परस्परविरहव्यापकत्त्वं सुस्थम्' इति तत्त्ववादि मतम्। तन्न। प्रतियोग्यारोपस्य प्रधानेन विरोध एव नास्तीति वक्ष्यमाणत्वात्। तदित्थम् । वस्तवसत्त्वाधिकरणे धटे प्रातिभासिकसत्त्वस्य अभावः (सत्त्वाभावः) वर्ततेऽपि न वस्तवसत्त्वाभावः इति परस्परवि-रहव्याकत्वं न युक्तम् । इति व्याहतिरनुपपाद्या ।

तत्राहुस्तरंगिणीकाराः। यत् 'सत्त्वासत्त्वयोः परस्परविरहतानभ्यु-पगमात्। सत्त्वेन प्रतीमानत्वंसत्त्वमित्यंगीकारात्' इत्युक्तं, तन्न। अ-प्रतीतिप्रयोजकासत्त्वस्य प्रतीत्यनौपाधिकस्य वक्तव्यत्त्वात् । तथा हि। सच्चेत् न बाध्येत, असत् चेत् न प्रतीयेत इति त्वन्मतम् । असतः प्रतीतिर्नास्ति, घटस्य तु अस्ति । तत्र अप्रतीतिप्रयोजकं किमिति पृष्टे, 'शशविशाणे सत्त्वेनप्रतीतिर्नास्ति, अतः प्रतीतिर्नास्ति' इति वक्तुं न शक्यते हि । एतादृश ग्रन्थस्य अस्ति अन्यत् व्याख्यानम्। तस्य कर्ताभवति कुण्डलगिरि आचार्यः। अयं कुण्डलगिरिः आचर्यः मूलतः आन्ध्रीयः। आदौ एषः पुट्टपर्ति समीपस्थे बेलूर-ग्रामेषु आसीत्। तस्य पिता कोण्डिभटः। एषः श्रीरङ्गपट्टणस्य सुन्दरनामकस्य राज्ञः आश्रये आसीत् । कुण्डलगिर्याचार्यः काश्यां अपठत् । एषः व्यासराजमठाधीशानां लक्ष्मीनाथश्रीचरणानां अन्तेवासी । तस्मिन् काले भट्टोजी दीक्षितैः तत्त्वकौस्तुभनामकमक-ग्रन्थं व्यरचि। तस्मिन् ग्रन्थे मध्वाचार्यस्य शब्दप्रयोगं स्वीकृत्य खण्डनं कृतः। तदसहमानः आचर्यः भट्टोजीमतकुट्टण-नामकं ग्रन्थं विरच्य तस्य भट्टोजीदीक्षितस्य मतं निराचक्रे। एवमेव "मध्वाध्वकण्टकोद्वारः" नामकग्रन्थेन अप्पय्य-दीक्षितस्य खण्डनं कृतं आचार्येण॥

कुण्डलगिरिआचार्यः मध्वाचार्यस्य तत्वोद्योतग्रन्थस्य उपरि टीकां विरचितवान्। एवं तत्त्वप्रकाशिकाटीका, अद्वैतामृतभङ्गः, भाष्यार्थ-दीपिका, पञ्चाधिकरणसारः न्यायसुधाव्यख्यानं, महाभारततात्पर्य-निर्णयव्याख्या इत्यादि अनेकग्रन्थान् विरचयामास। तेषु अन्यतमः "न्यायामृतरसकुलङ्कषा" इति न्यायामृतस्य व्याख्या। अयं अपूर्वग्रन्थः नैकेषां विदुषां पुस्तकेषु दृश्यते उदाहरणार्थः- कृ.त पाण्डुरङ्गि महोदयेन सम्पादिते पुस्तके प्रास्तविकनिरूपणसमये अस्य ग्रन्थस्य उल्लेखः दृश्यते। एवमेव स्वामी योगीन्द्रान-न्दमहाभागेन सम्पादितेऽपि न्यायामृताद्वैतसिद्धिः पुस्तकेऽपि अस्य उल्लेखः विद्यते। बि,एन्.के शर्मवर्यः अपि अस्य उल्लेखं कृतवन्तः। अयं आचार्यः न्यायामृतस्य अबाधितमर्थ स्वव्याख्यनेन प्रकटयन्ति। अतः एव अस्य ग्रन्थस्य सम्पादनमेव अहं शोध विषयत्वेन स्वीकृतवान्। तेन अधेतॄणामुपयेगायभवति। इति निरूप्य विरमामि | ओम् शम्

**उपयुक्त ग्रन्थसूचि:-**


1. व्यासतीर्थचरितम्-डा.प्रो.नारायण पूजार्, साहित्य अकदेमि,२०२१
2. न्यायामृताद्वैतसिद्धि,अनन्तकृष्ण शास्त्री, मेहर्चन्द् लच्म्नन्दस् नवदेहलि, १९८४
3. श्रीमन्न्यायामृतम्- कृ.त पाण्डुरङ्गि, Dwaita Vedanta studies and research foundation Bangalore, १९९४
4. श्रीमन्न्यायामृतम्- एम्,एस् रङ्गनाथाचार्यः, बृन्दावन-संस्था,मन्त्रालयः, १९९१
5. History of the Dvaita School of Vedānta and Its Literature- B. N. K. Sharma Dwaita Vedanta studies and research foundation,1996


**संदर्भः**

1 द्वन्द्वान्ते श्रूयमाणम् इति न्यायेन

2 व्युत्पत्त्यैक्येपि वैशिष्ट्यविवक्षया, धर्मद्वयविवक्षया च विकल्प-द्वयम्

3 इति साध्याप्रसिद्धिः

4 अभावप्रतियोगिकाभावः स्वप्रतियोगिप्रतियोगिरूप इति असत्त्वाभावः सत्त्वम् इत्यपि द्रष्टव्यम्

5 इदमपि विरुद्धधर्मद्वयसमवेशकथनात् साध्याप्रसिद्धावेव पर्यवस्यति

6 पुनराब्रुवन् मायावादिनः। एवमंगीकारेऽपि (आरोपितसत्त्वास-त्त्वयोः आरोपितासत्त्वसत्त्वयोःऐक्येऽपि),वास्तवसत्त्ववास्तवासत्त्वयोः परस्पर-विरहरूपत्वानुपपत्तेर्न व्याहतिः